This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2929

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
गंगालहरी	हीविद	धर्म	पुर्ण	-	3/6	32	संस्कृत	कागद				

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्री सत्यधर्म श्रीपादकृतगंगालहरीप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगुरुभ्योनमः ॥ ॥ ऋतधर्मयतीन्त्वाज्ञात्वातन्मुखतोमया ॥ तत्कृतालहरीव्याख्या
विशिष्टाक्रियतेसती ॥ १ ॥ इहकर्मज्ञानादिभिरनुकंपासंपादनेनकंसारेः संसारतरणाक
ल्पानल्पान्निरीक्ष्यशरणागतकरुणावशाः यतयोमितमतयोऽधुनाधरित्रीगतानांपवित्रीकर
णायवसुमतीविरचितावतरणायाःपरमपुरुषचरणाभरणायानिमज्जनेनसज्जनानांप्राचीना

जलेपीतेपीतेमनसिचशुचिलंजनकजाऽभिरामेश्रीरामेमतिरि
तिभवेस्मिन्नपिभवेत् ॥ सुमूर्द्धन्येमूर्धन्यानिमिषपुषोबिभ्रति
चयत्ससोमेसोमेसत्यविकुलललामेयदभवत् ॥ १ ॥

चीर्णदुरितदूरीकरणधुरंधरतरंगायाः गंगायाः कांचनलहरीमतएवस्वांतस्फुरद्धरिपदानुब
द्धांअतिशुद्धांतन्वानामन्वानास्तस्याः पठनाप्रविघटनायाःविनानिबंधंजनानबंधंत्यजंती
तितांनिबंधंति ॥ जलइति ॥ जले गंगाजले पीतेततएवमनसिशुचित्वंगतेसाति अने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमनःशुद्धिप्रदंपीतंगंगांभोनात्रसंशयइत्युक्तंभवति अस्मिन्नपिभवेजन्मनिश्रीरामेम
तिर्भवेत् अनिमिषपुष इंद्रस्यसुमूर्धन्येसोमे उमासहितेरुद्रे सोमोमेचंद्रेणसहितेमूर्धनिशि
रसिजलंबिभ्रतिसातितस्यापिअविकुलललामेसूर्यवंशातिलके रामेमतिः अभवत् अवयः
शैलमेषार्काइत्यमरः ॥ ततश्चाविविरुद्धप्रकाशेचंद्रे शिरासिजागरूकेपि भागीरथीपाथः
शिरोधारणप्रभावात् रविकुलतिलके रामेमतिरभवदेव भवदेवस्येतितादितरत्रतुविरोधि
समावेशाभावेन तादृशेरामेप्रतिपत्तिर्नाविप्रपात्तिमावहतीतिभावमाविश्वकारेतिज्ञातव्यम्
॥ १ ॥ हेगंगे गेयतोयेस्तवनीयेपानीये अगंस्वगमनप्रतिबंधकंनगम् अंहसां पात
कानांसंघंतल्लक्षणम् अपरंचनगंपर्वतंभंगैः आत्मीयतरंगैः करणैःभंगैर्नाशैरुपेतं नष्टमि
तियावत् कलयासिकर्तुंशक्नोषिअतःकलयेरेव किंच अंतेसघंघकारेणयुक्तं नगंगकारशून्यं
अगंततश्चागमित्यत्रगकारलोपेतत्स्थाने घकारेणयोगेच अघमितिनिष्पद्यते तच्चतेकिय
त् निवारयितुंसुलभमितियावत् अतस्तदपिभंगैरुपेतं कलयेरिति अवेमिजानामि किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च अस्मत्प्राचीनांहः संहारायवीचीभिर्नकृत्यं किंतु तत्संयुक्तैर्वातैरेवालामित्याह वातैरि
त्यादिना वातैः वा तैरितिछेदः वाशब्दोवधारणे तैःभंगैः किंच हरिपुरवसतेयानेया अ
नेनवांछा अनानामिनोमुख्यवायुः तस्यापेक्षानो अस्माकमितिशेषः नोअस्माकंनोइत्या
वृत्त्यान्वयोवा कुतइत्यतआह बहुत्वइति सएनान्ब्रह्मगमयति विद्युत्पतिर्वायुरेवनयेद्ब्रह्म

गंगेगंगेयतोयेनगमपरामिमंचांहसांसंघमंतेभंगैर्भंगैरुपेतंकलय
सिकलयेस्तेकियच्चेत्यवेमि॥वातैर्वातैःसुपक्वैरलमलममलेस्पर्श
मात्रेणगात्रेयानेयानेनवांछाहरिपुरवसतेर्नोबहुत्वेकिमांध्यं॥२॥

नचापरः वैद्युतेनैवतच्छ्रुतेः विद्युत्पतिनावायुनैवेति श्रुतिस्मृतिसूत्रतद्भाष्यादिभिरेव एक
स्यैववायोर्ब्रह्मप्राप्तिसाधनत्वंयदाप्रसिद्धंतदावातानांबहुत्वेकथंभगवत्प्रसादोदुर्लभःस्या
दितितात्पर्यम् ॥ २ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधेर्दैवस्यविपाकेसति दैववशादितियावत् गांगेगंगासंबंधिनिगांगेयस्फुरदतुलवर्णार्ण
सिजलेद्दगुपगेद्दग्विषयेसतिपाकेहाद्दतेः पाकशासनस्यपदमपिनापेक्ष्यम् किंचतज्जलं

नगांगेगांगेयस्फुरदतुलवर्णार्णासिविधेर्विपाकेपाकेहाद्दतिपदमपे
क्ष्यंद्दगुपगे ॥ अपारेपारेश्येसतइतिहरेरंघ्रिलसितंनकालेकाले
तंपदमधिभुदिश्यान्निजतुलं ॥ ३ ॥ ॥ ॥ ॥

अपारेनिरवधिकेपारेश्येपरेशत्वेसतोहरेः अंघ्रिलसितमितिहेतोःस्वद्रष्टृणामपिकालेनका
लेतंअनश्वरंशाश्वतमितियावत् अतःनिजतुलंस्वपदसद्दशंपदंस्छानंदिश्यात् ॥ ३ ॥

॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेप्रचेतश्चेतस्केवरुणतरुणिहरिपदरतेस्त्वत्पदरतेश्चेति नौआवयोःकाचिदपिनौकानार्ज्या
नसंपाद्या अतोहेतोः हेमातः ते विषमधिषणाविपरीतामतिः माअस्त्वतिशेषः यदि विष

ननौकानौकार्ज्याहरिपदरतेस्त्वत्पदरतेःप्रचेतश्चेतस्केभव
सिभवसिंधोश्चतरणे ॥ नमातर्मातस्तेविषमधिषणास्याद्य
दिनुतिंजनैर्यायाद्यायादितिवदसिमेतेसचसमः ॥ ४ ॥

मधिषणास्यात्तार्हि जनैर्नुतिंभवतीनयायात् अयात् शुभावहात् विधेरितिवदसिचेत्तार्हि
सेापिआवयोः समः अतश्च नविषमधिषणात्वयाकार्येतिभावः ॥ ४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेसुदति भागीरथित्वंममतनुजनुषःपुत्रस्यसदाएवदेवामितिनवदेः कुतइत्यतआह गांगे यइत्यादिना गांगेयः भीष्मः तनुभूभाग्यसदसिसंतानसंपत्संपन्नसदसिनगेयः नश्लाघ्यः

सदैवंदैवंमेतनुजनुषइत्यंबनवदेःसगांगेयोगेयोभवतितनु
भूभाग्यसदसि ॥ नदायादायादाःसुदतिसुदतींमत्प्रमु
खिनःसदारोदारास्तेतुचइतउदारेदिशदृशम् ॥ ५ ॥

तस्योर्ध्वरेतस्त्वेनसंतानहीनत्त्वादितिभावः किंच सुदतिदायादायपुत्रायसुदतींकन्यांना
दाःकुतश्चित्संपाद्येतिशेषः मत्प्रमुखिनस्तुतेतुचःपुत्राःसदारोदाराः सद्वितीयेष्वद्वितीयाः
इतःकारणात् हेउदारे गंगे दृशंत्वद्विषयिणींदिशेत्यन्वयार्थौ ॥ ५ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्तोकेषुनस्तोकेषुगांगेयेऽयेपिस्कंदोनमंदभाग्यः श्लाघ्यएवसदसीतिवदसिचेत्तद्दशापी
दृशीतिसुज्ञाविज्ञापयंति नेति स्कंदाभिधतुचितन्नामकेपुत्रेमेवचःनचस्कंदनस्खलितमभू
त्कुतइत्यतस्तवेत्यादि सचषाण्मातुरइतिहेतोःतवएकस्याःनिवासेनिकटेवासेअर्होयोग्यो

नचस्कंदस्कंदाभिधतुचिवचोमेतवसदानिवासेवासेर्होनस
भवतिषाण्मातुरइति ॥ कुमारेमारेर्ष्याननुगुणगुणेलक्ष्य
ललनेनमोहंमोहंनोभजकुरुचकुर्वेमयिकृपाम् ॥ ६ ॥

नतस्मात्कुमारे अलक्ष्यललनेअनाकलितकामिनीजने अतएव मारेर्ष्याननुगुणगुणेमोहं
ममतांनोभजअहंचनमःकुर्वेत्वमपिकृपांकुर्वित्यन्वयः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नयज्ञइति ॥ नीतिमति भवत्याःवनकणेजललवेशुभास्तेर्भास्तेश्चघटकेलब्धेसतियज्ञेज्योति
ष्टोमादौधीः कर्तव्यतामतिर्नभवति हेगुणोपेतेसुगुणेत्वत्तीरजेदर्भेपिपरगतेःससंदर्भेसति

नयज्ञेयज्ञेधीर्नभवतिभवत्यावनकणेशुभास्तेर्भास्तेर्वाघट
कइतिलब्धेत्रिपथगा ॥ ससंदभेंदर्भेसतिपरगतेरेकमयनं
गुणोपेतेपेतेगुणतइतिदिश्यानिजसुखम् ॥ ७ ॥

त्वंचत्रिपथगागुणतः अपेतेमयिपरगतेरेकमयनंमार्गोनिजसुखंचादिश्याइत्यन्वयः ततश्च
त्रिपथगायास्तवएकपथदानंनदुर्घटमितिभावः ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे अंबश्रीजानेःभगवतः चरणंअखिलंसंपूर्णंनजानेकिंतुत्वात्पितृमुखंतवापितुःसुखमयन
खस्यमुखंअग्रंवाभपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टत्यादेः निरीक्ष्य

नजानेश्रीजानेश्चरणमखिलंत्वत्पितृमुखंनिरीक्ष्यारीक्ष्या
णांपदमधिभुनैवास्मिविपदाम् ॥ इतीवातीवाातिप्रगुणव
चसांशुद्धमनसांकृपापात्रंपात्रंतररहितइत्यंबकुरुगाम् ॥ ८ ॥

अरीक्ष्याणांवैरिविलोक्यानांविपदांपदंनैवास्मीति अतीवप्रगुणवचसांऋजूक्तीनांकृपापा
त्रंदयास्पदंपात्रंतररहितश्चाहमितिहेतोःगांदृष्टिंकुरु ॥ ८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेनभोगेवियद्गंगे अतीरेअतिशायितईरोवायुर्यास्मिंस्तत्तथातस्मिन्तीरेतत्रापिनसुंदरमंदि
राभिलाषइत्याहुः कुटीरइति निवसतिंतथानीरेजनदुरितदूरीकृतिनिर्गतंरेजनंकंपनंयस्मा
त्तथाअंकंप्यंरेजृकंपने अरेजेतामितिऋग्व्यावसेर अरेजेतामकंपेतामभ्यसतेरेजतइतिभय
वेपनयोरितियास्कमाधवाक्तेः रेजतेःभाष्यकारानिष्टपक्षे अनीरेअनीले शुभ्रेअंजनातिदु

भवत्तीरेतीरेसुघटयकुटीरेनिवसतिंतलसन्नीरेनीरेजनदुरितदूरी
कृतिरुचिं॥ नभोगेभोगेछांहरिपदतुलस्यन्नमुखरैनिदेशैदेशेमां
जननिवसतांधेहिचसतां ॥ ९ ॥ ॥ ॥

रितानिपूर्ववदुर्वरितंईर्यंतेकंप्यंतइतीरितास्तरंगाः नितरामीराःयस्यांसातस्याः संबुद्धिः
तास्मिन्नीरेत्वदीयतोयेरुचिं हरिपदसमार्पिततुलसीमिश्रान्नादौ भोगेछांघटयेत्यन्वयः त
था देशेत्वदीयेवसतांसतांनिदेशेआज्ञायांमांनिधेहित्वद्दासदास्यंदेहीतिभावः ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे जननितवामोदं मोदंउदशून्यं केवलगंधंमरुदुपगंवाघ्वानीतं आघ्रायमृगःकस्तूरीमृ
गः विमदः विगताहंकारःसन् अभूतोपमःअविद्यमानोपमः सगंधःप्रसूनांतःजात्यादि
सुगंधिपुष्पांतःममम्रृगमदस्यांतरापिनदृश्यतइतिमत्वापराभूतः पलायितइतिशेषः तदा

तवामोदंमोदंमरुदुपगमाघ्रायविमदःप्रसूनांतर्नीतर्ममम्रृ
गमदस्येतिसम्रृगः ॥ पराभूतोभूतोपमउरुचरन्नध्वनिमरु
द्वरेदृष्टेदृष्टेकिमितिहटतोभूदितिशठः ॥ १० ॥ ॥

अध्वनिमार्गेपुनः मरुद्वरेवायौदृष्टेसति एवमुक्तप्रकारेण दृष्टेमदीये दैवोकिमिति हठतो
हठात्कारादिति शठोभूदिति ततश्चयद्वावायुनाउपानीतंगंधमाघ्राय अहंपराभूतोऽभ
वं सएववायुरायातइति ह्रियाशठोभूदितिभावः ॥ १० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्तेमयियदितेचित्तेममतामतार्हिअनीरेनिर्जलेवानीरेवंजुलेकुशाःदर्भाः शकुनयःपक्षि
णःतज्जन्मादिदिशेत्यन्वयः किंच अन्यथारहोरहसिउचितरचितेनापि होमेनतेचित्त्व
ह्यिषयकंज्ञानंकचनकापितस्मादपरमन्यंवरंनवृणे किंतुयथाकथंचित् त्वत्तीरवासितामे

अनीरेवानीरेकुशशकुनिजन्मादिदिशमेसदायत्तेयत्तेमयियदिम
तातेचममता॥रहोमेहोमेनाप्युचितरचितेनापिचसताक्कचित्तेचित्ते
हंवरमपरमस्मान्नहिवृणे॥११॥नानिर्वाणंवाणंत्वितरइतिनिर्वाण
मिवमेशुभोदेभोदेविन्त्रिनयनजटाजूटघटिते ॥ नदेहेदेहेचेज्जनानि
जनयेर्मज्जनमिदंसहस्रैर्हस्रैर्वासहनाकिमपीच्छामिवरदे ॥ १२ ॥

वेति ॥ ११ ॥ इतरेजनानिर्वाणंमोक्षमुद्दिश्यअणंतुममदेहेतुशुभोदेमंगलजलेभोदेविगंगे
सहस्रैर्बहुसंख्याकैः हस्रैः मूर्खैःसहनिर्वाणमिवगजमज्जनमिवमज्जनंकलयेश्चे त्तदेवालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात् हेनदेहेअब्धिवांछेततोपरं किमपिनिर्वाणादिकंनेच्छामित्यन्वयः त्वन्मज्जनेकृते स्वतएवमुक्तिर्भवतीतिभावः ॥ १२ ॥ हेसुसौभाग्येगंगेदुष्कर्मभरतःदुष्कृतिपौष्कल्यात् त्वंभाग्येऽनधिकृतइतिहेतोर्नादेयंनदीसंबंधि किमपिमज्जनादिकं तुभ्यंदेयंनभवति इतिमांप्रतिवदासिचेत्तर्हिमांप्रेक्ष्यविलोक्यैववद ततःत्वदीयप्रेक्षणमात्रात् मान्यंलोकोच्च

ननादेयंदेयंतवभवतिदुष्कर्मभरतःसुसौभाग्येभाग्येनधि
कृतइतिप्रेक्ष्यवदमाम् ॥ ततोमान्यंमान्यत्सकलमकलंकं
फलमियांनवाचावाचारादमृतनयनेतेस्त्याविदितम् ॥ १३ ॥

रम् अतएवा कलंकंसकलमपि फलमहमियां प्राप्नुयां तस्मादन्यत्मामास्तु हेअमृ
तनयने वाचाआचारात्वा ते आविदितंनास्ति ततश्चयथाकथंचित्त्वत्प्रेक्षणमात्रेण पात्रं
भवतिभवतिरस्करणस्येतिभावः ॥ १३ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेगंगेममापांगःयोग्योजोयोग्यःयोगिनामोजसासाध्यइतिभवतः नभवति इति वदासि चेत्तर्हिअपायोत्तरणे स्मृतिसिंधुतरणे इदमर्थात्त्वद्दयोदयाद्दिनापरउत्तमःउपायोनह्यस्ति

नयोग्योजोयोग्योभवतिभवतोपांगइतिचेदुपायोनापायो
त्तरणइदमर्थान्नाहिपरः॥विनानाथेनाथेजलधिदयितेविष्णु
विलसन्नखाज्जातेजातेस्मृतितइतिजीवामिजगति॥१४॥

हेनाथे विष्णुविलसन्नखाज्जाते अजातेअजात्चतुर्मुखादातेप्राप्तेतत्कमंडलुस्छत्वात् गंगेइति स्मृतितःजगतिजीवामीत्यन्वयः ततश्चवारंबारंतवस्मारंस्मारंजीवतस्तावकस्य भावुकंभवेदेवेदेवीतिभावः ॥ १४ ॥ ॥ ॥ ॥

॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे शिवलसन्मस्तकमणेगंगेतेतुभ्यंमस्तेनशिरसानमः अहमकृषितथापित्वंमन्मस्तकेय
द्यस्मात् करकिसलंपाणिपल्लवंनार्पयासितस्मात्त्वंनिजस्छानस्छानासीत्यन्वयः यस्मा

नमस्तेमस्तेनाकृषिशिवलसन्मस्तकमणेनिजस्थानस्थाना
सिकरकिसलन्नार्पयसियत् ॥ नयोपेतापेतापनयसुगुणा
नोतवगुणःस्वतोदोषादोषाकरसहनिवासस्यमहिमा ॥ १५ ॥

त्वंनयोपेतानीतिमती अपेतापनयसुगुणा अतएव स्वतोऽदोषाचतस्मादयंगुणः तवन किं
तुदोषाकरेणचंद्रेणसह निवासस्यमहिमा अहोअयंमहामहिमासहकारिणामिवसहवासि
नांयत्सहजमपिगुणमपिधायविपरीतशक्त्याधायकत्वमिति ॥ १५ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेपयोधेसुपादेसुर्दक्षिणःपादोयस्याःसातथा सुवरस्यपदद्वयंदक्षिणश्चैवसव्यश्चेत्याद्युक्तेः सुंदरपदारविंदे गंगेतेपादेपतितइति हेतोरहंयोधेनप्रतिपक्षिणासमतयानोह्यः नतर्क्यः अपितुतेपितुःकःअवयवः तेत्वयाउपास्यइति विवादेकृतेवादेप्रत्युत्तरवचनेत्वंनालंनसमर्थाभवासि भगवत्पदुपागतायास्तदुपासनस्यावश्यकत्वेनतथैववक्तुंयुक्तमपि त्वच्चरणाव

सुपादेपादेतेपतितइतिनोह्यःसमतयापयोधेर्योधेनापितुपि
तुरुपास्यःकइतिते ॥ विवादेवादेलंनभवासिपिशाचेश्वराशि
रोविलासोलासोयन्मयिमनसइत्थंसमुचितः ॥ १६ ॥

रणंमन्यमानेमयि तेदयितेकृपानचेत्त्वयानशक्यतेतथावक्तुमितिभावः अथापियद्यस्मात्त वपिशाचेश्वराशिरोविलासोस्तितस्मान्मयित्वन्मनसः अलासः अप्रसरःत्वद्वैमनस्यमिति यावत् उचितःयुक्तः ॥ १६ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेगंगेपुरारातेःरुद्रस्यरातेः मित्रस्यत्वदधिपतिसेतोः समुद्रनिबद्धसेतोरघुपतेःरामस्यप्रेष्यः
दूतोहंत्वयावृथाप्रेष्योनेत्यन्वयः त्वंतुतद्रामकृतसेतुबंधादिकंस्मारंस्मारंपुनःपुनःस्मृत्वा
तदिष्टमयिकृपांकुर्वीति ततश्चसिंधाविवबंधंमयितनुयादेवदेवइतिभियात्वयादयाविधेया

वृथाप्रेष्यःप्रेष्यस्त्वहमिहनगंगेतवपुरापुरारातेरातेस्त्व
दधिपतिसेतोरघुपतेः ॥ सतिस्मारंस्मारंतदनुगइतीष्टेकु
रुकृपांसरामोरामोस्तीत्यहनतवभीतिर्भवतिकिं ॥ १७ ॥

मयीतिसूचयंति किंचेयंभीतिर्नेतिचोत्प्रेक्षयंति सरामइत्यादिना रामयास्त्रियासीतयास
हितःसरामः तथाचसीतावियोगीवयोगीश्वरोवर्ततइतिबद्धःसेतुरब्धौतदानीमिदानींतुसी
तासमेतआयातइतिगभीरेनभीरेतिकिंतवेतिभावः ॥ १७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेगंगे राजर्षिपतिनाजन्हुनाप्रपीताअहंमहींभूमेमपीतातत्त्वंजन्हुत्वंततेवतत्वंयथार्थंन
भवतीति अहंकृतिमतीनभव कुतइत्यतआह दयादृष्टेगंगेअगस्त्यमुनिपःतवदृष्टेर्विषयो

प्रपीतापीताहंमहिमितिचराजर्षिपतिनानतत्त्वंतत्वंतेनभ
वतिभवाहंयुराधिभु ॥ दयादृष्टेदृष्टेर्वदनविषयोगस्त्यमुनि
पोनविप्रोविप्रोहंभवविभवदाकिंलघुगिरा॥ १८ ॥

नकिंवदेति किंचसविप्रोनकिंततश्चविप्रोहंयथातथाप्रकृष्टोहमकृत्वेतियावत् ममविभव
दाभवेति तथाच समुद्रपानकर्तुरगस्त्यस्येवममापिविप्रत्वान्मत्पुरस्त्वद्गर्वदर्शनमयुक्त
मितिभावः ॥ १८ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ङ्गेगभीरेगंगे त्वंयमसहजयायमुनयास्नेहसहितेति तदभिप्रेतप्रेतप्रवरोयमः तन्नगर्यांय
यापनंतंप्रतिप्रापणंतन्मतिरितिहेतोरेष्याभीः भीतिः धुताकुतइत्यतआह अंतितुसमीपए

गभीरेभीरेष्यायमसहजयास्नेहसहितेत्यभिप्रेतप्रेतप्रवर
नगरीयापनमतिः ॥ इतित्वंतित्वंताद्विरहसहितातत्पितृ
करावलोकेलोकेमज्जतिकृतकृपासीरितिधुता ॥ १९ ॥

वतस्यायमुनायाःविरहसहितेति इतोपिसाधुतेत्याहुः तत्पितेति तस्यायमुनायाः पिता
सवितातस्यकराःकिरणाःतेषांविलोकोदर्शनंतच्छून्येलोकेमज्जतिकृतकृपात्वमासीर्यतइ
त्यर्थः ततश्चसूर्योदयात्प्रागेवत्वयिमज्जनेनसुकृतविशेषइतिभावः ॥ १९ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए जननिस्वैरंयथाकामंअंजनजनककार्यैःपापसंपादककर्मभिःस्वैः स्वकीयैःयुतेआनितर
गतौत्वदितरशरणरहितेचारेभृत्येमयिमद्विषयेत्वयाविचारेकृतेप्रतिवदः प्रत्युत्तरकरणेश
क्तःकःनकोपीतिअतःहेकौकास्विनितोयनिकायेस्वकौकः त्वद्गृहंत्वत्संनिधिमितियावत्

युतेस्वैरंस्वैरंजननिजनककार्यैर्जननितेविचारेचारेमय्यनित
रगतौकःप्रतिवदः ॥ स्वकौकःकौकस्विन्यहमुपगतःसज्ज
नजनिःकृपायोग्योयोग्योरसिकसरसासीतिसुगुणे ॥ २० ॥

अहंउपगतः किंच त्वंरसिकसरसा अतएवाहं अयोग्योपिसज्जनजनिरितित्वत्कृपायो
ग्यइत्यर्थः ततश्चाहं दुरितैर्भरितोपि सत्कुलप्रसूतइति मत्कुलेवादृष्टिंविधायकृपांकु ॥ १० ॥
वितिभावः २० ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनामितमपिमितद्रुंसमुद्रंनावाप्लवेनतरितुंनालंनसमर्थाः हेअपारे अपगतदोषेगुणापारे
तेचरणशतपत्रच्छदधृतिः आश्रितत्वत्पादारविंदैकपत्रः भवाब्धेः संसारसागरस्यपरतटं

जनावानावालंमितमपिमितद्रुंचतरितुंगुणापारेपारेचरण
शतपत्रच्छदधृतिः ॥ भवाब्धेरेवाब्धेरमणिरमणीयेपरतटं
यतोयातायातातमपिचनयाचेतवबलात् ॥ २१ ॥

परंपारंयातागंताभूयासामितिशेषः हेअब्धेरमणितवबलात्त्वत्प्रसादप्रभावात् त्वंयतोआ
याताभुवंप्रतीतिशेषः तमपिनयाचे ततश्चत्वच्चरणाश्रयादेवभवाब्धितरणंकर्तुंशक्यमिति
तदर्थंभगवत्पदमपिनापेक्षितमितिभावः ॥ २१ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिरिः मंदरः अक्षुब्धोपिअमथनदंडोपिक्षुब्धःकृतः तथादयादःश्रीहरिः आदितिजादि
तिजैःसुरासुरैः सहयादोभ्याकुलकलशवार्धौयादोभ्याः जलजंतुश्रेष्ठास्तदाकुलः कलश
वार्धिः क्षीरसमुद्रः तस्मिन्मथनकृत् अन्यायेअन्येषामायोभागस्तस्मिन्वृतान्यायेसत्य
पिअमृतंसहजविषंस्वेनसहोत्पन्नविषमपियत् यस्मात् आसीत् तेषांतोषायेतिशेषः अत

गिरिःक्षुब्धोक्षुब्धोदितिजदितिजैःसाकमितिमेदयादोयादो
भ्याकुलकलशवार्धौमथनकृत् ॥ वृतान्यायेन्यायेसहजवि
षमासीयदमृतंत्वभिप्रायःप्रायस्तदधिरसनंनोतवजलं॥ २२॥

स्तदधिरसनंतेषांदेवानामधिरसनंरसनायांप्रायः तवजलंनोकदापिनाभूदित्यभिप्रायः तत
श्रमंदरंमंथानंमुरमथनंमथनकृतंअनयेन दितितनयानांभागापहरणंचविधायापिसुधायाः
संपादनंविबुधानामधिरसनंत्वदीयतोयालाभमूलमितिभावः ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दधीचःऋषेःधीचौर्यात् तथासुगतेः तत्प्राणगमनानंतरंतस्यास्थ्नायंपविः इंद्राशनिः कृतः तथापिअविपपक्षैकदलनःपर्वतपक्षमात्रविभेदकःअभूत् हे अरोषेमहोदेअहोदेविगंगेते तोयंतुरोषेणअचलकुलंपर्वतव्रातंअघार्द्रींश्चदलयत् द्विजानांसमवनंयथातथासुगतिंचरा

दधीचोधीचौर्यादमरवरतोस्थ्नाप्यसुगतेःकृतोयंतोयंतेपवि
रविपपक्षैकदलनः ॥ अरोषेरोषेणाचलकुलमघार्द्रींश्चदल
यन्महोदेहोदेविद्विजसमवनंरातिसुगतिम् ॥ २३ ॥

तिददातिततश्चदधीचऋषेरसुगतिंविरचय्यरचितोपिजंभारेर्दंभोलिरचलपक्षदलनमात्रद
क्षः त्वज्जलंतुमज्जकाघपर्वतसर्वागंविदलयत् द्विजानांसुगतिंचरातीतिपुरुहूतहेतिरपि
यतोयसाम्यंवहतीतिभावः ॥ २३ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...परमुत्कृष्टंअभेद्यमितियावत् आगः अपराधः नगणनीयंकिंतुरागोत्कासस्नेहा
भव किंचत्वंसुविप्राप्यासमीचीनविप्रैराप्याअतः मयाप्राप्यासि नीतितः जनन्यपि अ
सितस्मात् हेशुभोत्कंठेगंगेत्वत्पतितइतिकथंउच्चामित्यजामि किंच तेप्रजापुत्रोभीष्मः

परागोरागोत्काभवनगणनीयंयदसिमेसुविप्राप्याप्राप्याभ
वसिजननीनीतितइति ॥ शुभोत्कंठेकंठेपतितइतिहोच्चा
मिसकथंप्रजातेजातेर्ष्यापितरमतुदत्संस्मरकथाम् ॥ २४ ॥

जातार्ईर्ष्याउत्पन्ना क्षांतिः पितरंश्रीकृष्णमतुदितिकथांत्वंस्मर तथाच नीतितः जननी
त्युक्तरीत्या अहमपितेपुत्रइति मयि दयावतीभवतीनभवतिचेद्गांगेयइवजातेर्ष्यस्तनु
यामनयामितिविनेयेविनयंवहेतिभावः ॥ २४ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदारेउत्कृष्टेकेदारेक्षेत्रेजलदनिकरःवारिवाहसमूहःजलंनरातिनददातिचेत् तथससस्ये
जातावेकवचनं उपपातीतिसस्येनादिविपःतदादिशकुनिसमुदायःकिंभजतिनाकिमपित
तश्चसकलानामापिजलविकलानांसतांवैफल्यमेवयुक्तंइति साफल्यंमेकथंस्यात्तेषुपक्षिपा
तस्येतिभावः तद्दत्तेकृपापांगोयदिमायिपतन्भवतितदाअन्योपांगःमन्मथःकिंभजतित

उदारेकेदारेजलदनिकरोरातिचजलंनसस्येसस्येनादिविप
उपपातीभजतिकिं ॥ कृपापांगोपांगोयदिभवतितेन्योमाय
पतन्तथाबालेबालेंद्दनुगतसुसस्विन्यसिनकिं ॥ २५ ॥

तश्चत्वदुपांगोमदुपांगंपतितश्चेन्मन्मथोनमन्मथोभवेदिति अतएव बालत्वादेवत्वायिम
दपांगोनपातनीयइत्यतआह बालेंद्दित्यादिना बालेंद्दनुगतसुसदमितीशिवशिरसिबालें
दोरासिसत्वात् तत्सहवासिनीत्वंनकिमित्यर्थः तथाच बालसहवासवत्याभवत्याबालेम
यिकटाक्षनिक्षेपोयुक्तएवेतिभावः ॥ २५ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपजलधिललनेविष्णुनखजेनभोगेवियद्गंगेभोगेतेभोगवति भागीरथीभोगवतीत्यादेः स्वरपगेस्वर्नदि आपगात्वपगापिचेतिह्रिरूपकोशः इलालंकृतिकृतेभूभूषणकारिणि

अयेगंगोत्तुंगेजलधिललनेविष्णुनखजेनभोगेभोगेतेस्व
रपगइलालंकृतिकृते ॥ विदेदेविस्यामेमुदइतिवदन्मातर
निशंस्मरन्गायन्नृत्यन्नविगलदियांमंगलमहं ॥ २६ ॥

गंगोत्तुंगेउत्तमगंगेत्वंममविदेभगवज्ज्ञानाय अतएवमुदे तत्साध्यानिजानंदायचस्याइति गायन्स्मरन्नृत्यन्गानस्मरणपूर्वकंनर्तनंकृत्वेत्यर्थः अविगलत्शाश्वतंमंगलंइयांल भेयमिति ॥ २६ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इयत्ताप्रबंधनभागीरथींस्तुत्वाजान्हवीजलानिध्योःकंचनविनोदमनूद्यतंप्रार्थयते मुखेति हेगंगे तवयामुखच्छायाशुद्धानजन्हुरुपगतःकिमितिवदंतंउदन्वंतंप्रतिनजन्हुरागतइति मन्मुखमनच्छच्छायंकुंभसंभव आयातइतीतिनर्मच्छलेनमर्मस्पृशंतीगंगावदति तवेत्या दि हेपतेतवकलशजःअगस्त्यः उपायानितिवार्तायाःतच्छ्रवणादितियावत् आर्ताम्लाना

मुखच्छायाछायानपुनरुपगोजन्हुरितिकिंतवार्तावार्तायाःक
लशजउपायानितिपते ॥ नदक्षोदक्षादेबहुमुखिविनोदेति
चतुरातरंगैरंगैरस्वजतयुवयोर्मैस्तुसमुदे ॥ २७ ॥

नना अहमभवामितिपुनःप्रियांपयोधिराह नेति हेबहुमुखि अतएव ममउदक्षोदेजलशोष णेनदक्षानसमर्था असमर्थापिविवादेअतिचतुरानानाविधवचनचातुरीमतीति ततश्चैवमु क्तयायांत्वांयोजलानिधिःतरंगैस्तदात्मकैरंगैरबयवैरस्वजत तयोर्युवयोर्जायापत्योःसपूर्वो विनोदःमे मुदेतोषायास्तु ॥ २७ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...रालंकारभरितंदुरितहरहारिचरणजायाचरितानुवादंविधायापिगर्वखंडनंकुर्वंतइवगुर्व
धीशाःशंसंति नवेति अस्यांअनुप्रासःनवानैव सुपदपदवीसुंदरपदपद्धतिश्चनास्ति रसः
शृंगारादिःनैवअलंकारःरूपकादिरपिनास्ति फाणितिरपि फाणितसमाखंडशर्करावत्तमधु

नवानुप्रासोयत्सुपदपदवीनापिचरसोनवालंकारोस्यांफ
णितिरपिफाणितसमा ॥ तथापीयंयच्छ्रीहरिचरणजास्तो
त्रलहरीछलाधर्याङ्काठ्यायतिविरचितेत्युस्तुरुचिता ॥२८॥
इतिश्रीगंगालहरीसमाप्ता ॥ ॥ ॥

रानभवाति तथापिउपादेयतारकारणगुणशून्यापिइयंहरिचरणजास्तोत्रलहरीहरिचरण
जायाःभागीरथ्याःस्तोत्रंतस्यलहरी अतएव हर्याव्हाठ्याहरीतिपदघटितायतिविरचिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेतिहेतोःरुचितासंग्राह्याअस्तित्वत्यन्वयः अस्मादादिषेद्यार्थस्तुअस्यांलहर्यांयद्यस्मान्न
वानुप्रासः प्राचीनेषुनिबंधेषुकुत्राप्यविद्यमानत्वान्नवोनूतनःअनुप्रासःएवंनवालंकारइति
यद्वा यस्यामलंकारःअलमितिशब्दःनभवति कियद्वारंश्रुतायांउदाहृतायामप्यस्यांनालं
मतिर्मतिमतांभवतीतिभावः किंचेयंसुपदपदवी शोभनंपदंवैकुंठादिस्छानंतस्यपदवी
मार्गरूपा यद्वा सुपदस्यसुवरस्यपदद्वयमित्युक्तेःसुनामकस्यस्वस्तवनीयमंदाकिनीजन
कपदस्यपदवीतिस्वित्यानंदःसमुद्दिष्टइत्युक्तेस्विति पदंवाचकंयस्यतत्सुपदंस्वरूपानंद
स्तस्यपदवीतियाइतरत्स्फुटार्थमिति ॥ २८ ॥ ॥ ॥

स्वभावमधुरागंगालहरीगुरुभिःकृता ॥ तन्माधुरीयंतट्टीकालिखितातन्निदेशतः ॥ १ ॥
सरसांलहरीमेतांसेवंतेयेचसज्जनाः ॥ तन्माधुरींनत्यजेयुःसरसग्राहिणोयतः ॥ २ ॥ गु
र्वधीशकृतागंगालहरीहरिहर्षदा ॥ यस्माद्गुरौहरौमेचरतिदास्तुनचान्यथा ॥ ३ ॥ नयाचे
याचेत्वामतिमतिरहंदेहिसुजलेजलेशंलेशान्यंहरिगुरुपदेभक्तवरदे ॥ सुभक्तिंभक्तयाढ्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ॥ सातसुकृपयापादजनितेस्वदायादायोक्तांममगुरुनुतेदोषरहिते ॥ ४ ॥ श्रीसत्यधर्मश्री
पादकृतगंगालहरीटीकासमाप्ता ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥

इदंपुस्तकंमोहमय्यांपुरि ईश्वरतत्त्वप्रकाशयंत्रालये कशाळीकरोपाभिधरामकृष्णा
त्मजेन लक्ष्मीनारायणचरणाब्जसेवापरायणेनानंतशर्मणा श्रीमत्गंगाभक्तमुदे
यत्नतोमुद्रितम् ॥ शके १८०३ वृषनाम्निसंवति भाद्रपदशुक्लद्वितीयायांभृगौमुद्र
यित्वासमाप्तिमगमत् ॥ श्रीव्यंकटेशप्रसन्न ॥ शुभंभवतु ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.03.20 10:31
,TRANSFERRED=2020/03/19 at 10:37:01
,PAGES=33
,TYPE=STD
,NAME=S0002983
,Book Name=M-2929-GANGALAHARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection